# Svasti Garbhavinayaka Ashtakam

# સ્વસ્તિગર્ભવિનાયકાષ્ટકમ્

## Document Information

Text title : Svasti Garbhavinayaka Ashtakam

File name : svastigarbhavinAyakAShTakam.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Author : Sanatana Gopala Sharma

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

*sanskritdocuments.org*

Svasti Garbhavinayaka Ashtakam

# સ્વસ્તિગર્ભવિનાયકાષ્ટકમ્

(સન્તાનગોપાલશર્મકૃતમ્)
શ્રીપતિપ્રિયભાગિનેયમુમાસુતં શિવનન્દનં
ભક્તવત્સલમપ્રમેયમનાદિમન્તવિવર્જિતમ્ ।
સર્વલોકહિતઙ્કરં નમતામભીષ્ટદમુત્તમં
સ્વસ્તિગર્ભવિનાયકં પ્રણમામિ ષણ્મુખસોદરમ્ ॥ ૧॥

આખુવાહનમમ્બિકાસુતમપ્રમેયગુણોજ્જ્વલં
સર્વસિદ્ધિદમીશપુત્રમચિન્ત્યપુણ્યફલપ્રદમ્ ।
નારદાદિમુનીન્દ્રષટ્પદસેવિતાઙ્ઘ્રિસરોરુહં
સ્વસ્તિગર્ભવિનાયકં પ્રણમામિ શઙ્કરનન્દનમ્ ॥ ૨॥

દૃપ્તમુગ્ધશઠાદિ દુસ્ત્યજવિઘ્નકારણવારણં
સચ્ચરિત્રવિચિત્રદુસ્ત્યજવિઘ્નવારણવારણમ્ ।
વાસવાદિ સુરાસુરૈરનિશં પ્રપૂજિતવિગ્રહં
સ્વસ્તિગર્ભવિનાયકં પ્રણમામિ લોકહિતઙ્કરમ્ ॥ ૩॥

સર્વરોગહરં હરાત્મજમમ્બુજાસનપૂજિતં
ભક્તવત્સલમગ્રદિક્પરિપાલકં ત્રિશિરઃપુરે ।
નન્દિવન્દિતમિન્દુભૂષણમિન્દિરારમણપ્રિયં
સ્વસ્તિગર્ભવિનાયકં પ્રણમામિ સર્વસુખપ્રદમ્ ॥ ૪॥

શાસ્તૃ નન્દિસદાશિવેન્દ્ર નરાનનાદિવિનાયકૈઃ
વેદમાતૃ જગદ્ગુરૂતમ શઙ્કરાદિભિરેવ ચ ।
સ્કન્દમારુતિદક્ષિણાસ્ય નવગ્રહૈરપિ દુર્ગયા
સર્વતઃ પરિવારિતોઽયમતીવ ચારુ વિરાજતે ॥ ૫॥

વેદપારગતૈરભિષ્ટુતમન્વહં નિજસન્નિધૌ
વેદમૂર્તિમમોઘભાગ્યદમાદિમાદિ ગજાનનમ્ ।
વેદશાસ્ત્ર પુરાણપણ્ડિતમણ્ડિતપ્રિય સન્નિધિં

વેદ કોન્વિમમુત્તમોત્તમદૈવતં કલિનાશનમ્ ॥ ૬॥

ત્રૈશિરઃ પુરમાતૃભૂતશિવાલયં પરિપાલયન્
પૂર્વદિક્સ્થિત એષ નૂનમપૂર્વસુન્દરવિગ્રહઃ ।
સ્વસ્તિગર્ભવિનાયકોઽયમુપાસ્યતામનુ સેવ્યતાં
પ્રાપ્નુમાયુરરોગતામતુલં યશોઽખિલ સમ્પદઃ ॥ ૭॥

લડ્ડુકૈ રુચિરૈરતિપ્રિયમોદકૈસ્સરસૈર્નવૈઃ
ઇક્ષુખણ્ડ કપિત્થદાડિમનારિકેલ ફલૈરપિ ।
એકવિંશતિ સઙ્ખ્યયા કૃતવન્દનૈરપિ તોષિતઃ
સ્વસ્તિગર્ભવિનાયકો વિદધાતિ નઃ શુભમઙ્ગલમ્ ॥ ૮॥

ઇતિ સન્તાનગોપાલશર્મકૃતં સ્વસ્તિગર્ભવિનાયકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Narendran Madathil

*Svasti Garbhavinayaka Ashtakam*
pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*